5

ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 12 ]

Total No. of Printed Pages : 12 ]

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 47 ]

Total No. of Questions : 47 ]

**ಸಂಕೇತ ಸಂಖ್ಯೆ: 67-S**

**Code No. : 67-S**

**C**

**CCE PR**
**UNREVISED**
**FULL SYLLABUS**
**NSR & NSPR**

**Question Paper Serial No. 712**

## ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ — ಸಂಸ್ಕೃತ

## Subject : Third Language — SANSKRIT

## तृतीयभाषा — संस्कृतम्

**(ಪುನರಾವರ್ತಿತ ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / ಎನ್.ಎಸ್.ಆರ್. & ಎನ್.ಎಸ್.ಪಿ.ಆರ್.)**

**( Private Repeater / NSR & NSPR )**

ದಿನಾಂಕ : 16. 06. 2023 ] [ Date : 16. 06. 2023

ಸಮಯ : ಬೆಳಗ್ಗೆ 10-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-30 ರವರೆಗೆ ] [ Time : 10-30 A.M. to 1-30 P.M.

ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] [ Max. Marks : 100

***ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ 47 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

***परीक्षार्थिनां सामान्यसूचनाः***

1. अस्मिन् प्रश्नपत्रे वस्तुनिष्ठाः विषयनिष्ठाश्च सप्तचत्वारिंशत् (47) प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति अवलोकयत ।
3. वस्तुनिष्ठानां विषयनिष्ठानां च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

इतः कर्तयत

TEAR HERE TO OPEN THE QUESTION PAPER
प्रश्नपत्रमुद्घाटयितुमितः कर्तयत

Tear here

**I. अधोलिखितप्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत ।** **10 × 1 = 10**

1. 'पर्वतः' अस्य समानार्थकं पदम् इदं भवति ।

(A) विपिनम् (B) अद्रिः

(C) कमलम् (D) जलम्

2. 'आदरः' अस्य विरुद्धार्थकं पदम् इदं भवति ।

(A) सादरः (B) सोदरः

(C) अनादरः (D) बधिरः

3. 'ग्रन्थालयः' अत्र एषा विभक्तिः अस्ति ।

(A) प्रथमाविभक्तिः (B) द्वितीयाविभक्तिः

(C) तृतीयाविभक्तिः (D) चतुर्थीविभक्तिः

4. 'भवति' अत्र एषः लकारः अस्ति ।

(A) लट्लकारः (B) लुट्लकारः

(C) लृट्लकारः (D) लोट्लकारः

5. 'अश्नामि' अत्र एषः पुरुषः वर्तते ।

(A) प्रथमपुरुषः (B) मध्यमपुरुषः

(C) उत्तमपुरुषः (D) अन्यपुरुषः

6. समूहेतरपदम् इदं भवति ।

(A) भवदीयः (B) मध्यमः

(C) गुणवान् (D) ततः

7. छात्रः <u>पाठं</u> पठति । अत्र रेखाङ्कितपदस्य कारकम् इदं भवति ।

(A) कर्तृकारकम् (B) सम्प्रदानकारकम्

(C) करणकारकम् (D) कर्मकारकम्

8. 'कर्तुम्' अत्र एषः प्रत्ययः वर्तते ।

(A) शतृ प्रत्ययः (B) तुमुन् प्रत्ययः

(C) शानच् प्रत्ययः (D) क्त्वा प्रत्ययः

9. 'अनुरूपम्' अत्र एषः समासः अस्ति ।

(A) अव्ययीभावः (B) तत्पुरुषः

(C) द्वन्द्वः (D) कर्मधारयः

10. अहं पत्रं लिखन् अस्मि । अत्र कृदन्तपदम् इदं भवति ।

(A) अहम् (B) पत्रम्

(C) लिखन् (D) अस्मि

**II. चतुर्थं पदं लिखत ।** **5 × 1 = 5**

11. जानकी – सीता :: दाशरथिः – ........................ ।

12. मद्रराजः – शल्यः :: अङ्गराजः – ............................ ।

13. गीताचार्यः – श्रीकृष्णः :: पार्थः – ........................ ।

14. जलम् – शुष्यति :: पादपाः – .................... ।

15. दक्षिणामूर्तिः – गुरुः :: हिमघ्नः – ......................... ।

**III. एकवाक्येन उत्तरं लिखत ।** **5 × 1 = 5**

16. विश्वसंस्कृतपुस्तकमेला कुत्र सम्पन्ना ?

17. अपूर्णानि राजगोपुराणि केन निर्मितानि ?

18. पठनार्थं का आवश्यकी ?

19. कः इन्दु क्षीरनिधाविव प्रसूतः ?

20. उपमालङ्कार कति अंशाः भवन्ति ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **6 × 2 = 12**

21. विश्वसंस्कृतपुस्तकमेलायां के के अंशाः आसन् ?

22. मेलुकोटेक्षेत्र आकर्षकस्थानानि कानि ?

23. ग्रन्थालयस्य ग्रन्थपालः किम् अचिन्तयत् ?

24. पञ्च अचोरहरणीयानि कानि ?

**अथवा**

कालान्तरे कानि विनश्यन्ति ?

25. गणेशः कीदृशः ?

26. रघुवंशीयराजाः कथम् आसन् ?

**V. संस्कृतभाषया अनुवादं कुरुत ।** **1 × 2 = 2**

27. ನಗರದಲ್ಲಿ ಸುಂದರವಾದ ಉದ್ಯಾನವಿದೆ. ಆ ಉದ್ಯಾನದಲ್ಲಿ ವಿಶಾಲವಾದ ಸರೋವರವಿದೆ.

There is a beautiful garden in the city. There is a large lake in the garden.

**VI. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 × 2 = 2**

28. नारिकेलवृक्षः कल्पवृक्षः इति भूलोके जनाः भावयन्ति । अस्य वृक्षस्य सर्वे भागाः उपयोगाय भवन्ति ।

**VII.** 29. **विग्रहवाक्यं लिखत ।** **1 × 2 = 2**

a) प्राप्तानन्दः ।

b) प्रतिदिनम् ।

**अथवा**

**समस्तपदं लिखत ।**

a) चक्रं पाणौ यस्य सः = .................

b) विघ्नानाम् अभावः = ..................

**VIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत ।** **1 × 2 = 2**

30. सोमदत्तः अभिमन्युः इव शूरः ।

**IX. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **2 × 3 = 6**

31. "भवतः का गतिः भवेत्" ?

क: पाठः ? कः अवदत् ? कम् अवदत् ?

32. "जित्वा पृथिवीं ददामि" ।

क: पाठः ? कः अवदत् ? कम् अवदत् ?

**X.** 33. **सन्धिं विभज्य नाम लिखत ।** **1 × 3 = 3**

a) बालस्तत्र

b) देवालयः

c) हरिरेव ।

**XI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

34. 'मनसि वचसि काये पुण्यपीयूषपूर्णाः' ।

**XII. कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **2 × 3 = 6**

35. भोजराजः ।

**अथवा**

डा. बा.श्री. रामकृष्णराव् ।

36. भासः ।

**XIII. पद्यपाठस्य नाम विलिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** **4 × 3 = 12**

37. चतुर्विधा भजन्ते मां जनास्सुकृतिनोऽर्जुन ।

आर्तोजिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ।।

38. शैशवेऽभ्यस्त विद्यानां यौवने विषयैषिणाम् ।

वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ।।

39. हिमालयो नः पूज्यश्शैलः

पूज्यनदी सा गङ्गाम्बा ।

साहित्यं नस्सङ्गीतमपि

भाषा भेदेऽप्येकमिह ।।

40. शिक्षा क्षयं गच्छति कालपर्ययात्

सुबद्धमूला निपतन्ति पादपाः ।

जलं जलस्थानगतं च शुष्यति

हुतं च दत्तं च तथैव तिष्ठति ।।

**XIV. पद्यपाठस्य नाम विलिख्य पद्यं पूरयत ।** **1 × 3 = 3**

41. गुरवे ................................................................................ ।

................................................................................ नमः ।।

**XV. दशवाक्यैः उत्तरं कर्नाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत।**

**3 × 4 = 12**

42. भारतस्य विविधतायाम् एकतां वर्णयत ।

43. 'उभयभारती भारतस्य आदर्शनारी' इति विषयं सङ्गृह्य लिखत ।

**अथवा**

'विक्रमः वेतालश्च' इति कथां सङ्गृह्य लिखत ।

44. कृष्णेन अर्जुनस्य मिथ्याभिमानः कथं खण्डितः ।

**XVI. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 × 5 = 5**

45. संस्कृतसाहित्ये सुभाषितानां वैशिष्ट्यपूर्णं स्थानम् अस्ति । शोभनं भाषितं, सुन्दरं भाषितं, सम्यक् भाषितम् इति वा सुभाषितम् । वेदेषु इतिहासपुराणेषु काव्येषु च सुन्दराणि लोकनीतियुक्तानि सुभाषितानि दृश्यन्ते । सुभाषितानि मानवान् सन्मार्गे नयन्ति । तानि व्यवहारचातुर्यं तत्त्वं च उपदिशन्ति । एतेषाम् अध्ययनेन ज्ञानं व्यवहारकौशलं च वर्धते । युक्तायुक्त विवेचनाज्ञानं लभ्यते ।

i) संस्कृतसाहित्ये सुभाषितानां कीदृशं स्थानम् अस्ति ?

ii) कानि मानवान् सन्मार्गे नयन्ति ?

iii) कुत्र लोकनीतियुक्तानि सुभाषितानि दृश्यन्ते ?

iv) सुभाषितानि किं किं उपदिशन्ति ?

v) सुभाषितं नाम किम् ?

**XVII. द्वादशवाक्यैः प्रबन्धं लिखत ।** **1 × 5 = 5**

46. ''परिसरमालिन्यम्'' ।

**अथवा**

सङ्गणकयन्त्रम् ।

**XVIII. पत्रं लिखत ।** **1 × 5 = 5**

47. प्रवासार्थं धनं प्रेषयितुं पितरं प्रति पत्रं लिखत ।

**अथवा**

उडुपिमण्डलस्य सर्वकारीयविद्यालयस्य छात्रः/छात्रा इति मत्वा दिनत्रयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्र लिखत ।